प्रचंड चंडिका स्तवराजः (श्री छिन्नमस्ता स्तोत्रं)

प्रचंड चंडिका स्तवराजः (श्री छिन्नमस्ता स्तोत्रं)

आनंदयित्रि परमेश्वरि वेदगर्भे
मातः पुरंदरपुरांतरलब्धनेत्रे |
लक्ष्मीमशेषजगतां परिभावयंतः
संतो भजंति भवतीं धनदेशलब्ध्यै || 1 ||

लज्जानुगां विमलविद्रुमकांतिकांतां
कांतानुरागरसिकाः परमेश्वरि त्वां |
ये भावयंति मनसा मनुजास्त एते
सीमंतिनीभिरनिशं परिभाव्यमानाः || 2 ||

मायामयीं निखिलपातककोटिकूट-
-विद्राविणीं भृशमसंशयिनो भजंति |
त्वां पद्मसुंदरतनुं तरुणारुणास्यां
पाशांकुशाभयवराद्यकरां वरास्त्रैः || 3 ||

ते तर्ककर्कशधियः श्रुतिशास्त्रशिल्पै-
-श्छंदोऽभिशोभितमुखाः सकलागमज्ञाः |
सर्वज्ञलब्धविभवाः कुमुदेंदुवर्णां
ये वाग्भवे च भवतीं परिभावयंति || 4 ||

वज्रपणुन्नहृदया समयद्रुहस्ते
वैरोचने मदनमंदिरगास्यमातः |
मायाद्वयानुगतविग्रहभूषिताऽसि
दिव्यास्त्रवह्निवनितानुगताऽसि धन्ये || 5 ||

वृत्तत्रयाष्टदलवह्निपुरःसरस्य
मार्तंडमंडलगतां परिभावयंति |
ये वह्निकूटसदृशीं मणिपूरकांत-
-स्ते कालकंटकविडंबनचंचवः स्युः || 6 ||

कालागरुभ्रमरचंदनकुंडगोल-
-खंडैरनंगमदनोद्भवमादनीभिः |
सिंदूरकुंकुमपटीरहिमैर्विधाय
सन्मंडलं तदुपरीह यजेन्मृडानीं || 7 ||

चंचत्तडिन्मिहिरकोटिकरां विचेला-
-मुद्यत्कबंधरुधिरां द्विभुजां त्रिनेत्रां |
वामे विकीर्णकचशीर्षकरे परे ता-
-मीडे परं परमकर्त्रिकया समेतां || 8 ||

कामेश्वरांगनिलयां कलया सुधांशो-
-र्विभ्राजमानहृदयामपरे स्मरंति |
सुप्ताहिराजसदृशीं परमेश्वरस्थां
त्वामद्रिराजतनये च समानमानाः || 9 ||

लिंगत्रयोपरिगतामपि वह्निचक्र-
-पीठानुगां सरसिजासनसन्निविष्टां |
सुप्तां प्रबोध्य भवतीं मनुजा गुरूक्त-
-हुंकारवायुवशिभिर्मनसा भजंति || 10 ||
शुभ्रासि शांतिककथासु तथैव पीता
स्तंभे रिपोरथ च शुभ्रतरासि मातः |
उच्चाटनेऽप्यसितकर्मसुकर्मणि त्वं
संसेव्यसे स्फटिककांतिरनंतचारे || 11 ||

त्वामुत्पलैर्मधुयुतैर्मधुनोपनीतै-
-र्गव्यैः पयोविलुलितैः शतमेव कुंडे |
साज्यैश्च तोषयति यः पुरुषस्त्रिसंध्यं
षण्मासतो भवति शक्रसमो हि भूमौ || 12 ||

जाग्रत्स्वपन्नपि शिवे तव मंत्रराज-
-मेवं विचिंतयति यो मनसा विधिज्ञः |
संसारसागरसमृद्धरणे वहित्रं
चित्रं न भूतजननेऽपि जगत्सु पुंसः || 13 ||

इयं विद्या वंद्या हरिहरविरिंचिप्रभृतिभिः
पुरारातेरंतः पुरमिदमगम्यं पशुजनैः |
सुधामंदानंदैः पशुपतिसमानव्यसनिभिः
सुधासेव्यैः सद्भिर्गुरुचरणसंसारचतुरैः || 14 ||

कुंडे वा मंडले वा शुचिरथ मनुना भावयत्येव मंत्री
संस्थाप्योच्चैर्जुहोति प्रसवसुफलदैः पद्मपालाशकानां |
हैमं क्षीरैस्तिलैर्वां समधुककुसुमैर्मालतीबंधुजाती-
-श्वेतैरब्धं सकानामपि वरसमिधा संपदे सर्वसिद्धये || 15 ||

अंधः साज्यं समांसं दधियुतमथवा योऽन्वहं यामिनीनां
मध्ये देव्यै ददाति प्रभवति गृहगा श्रीरमुष्यावखंडा |
आज्यं मांसं सरक्तं तिलयुतमथवा तंडुलं पायसं वा
हुत्वा मांसं त्रिसंध्यं स भवति मनुजो भूतिभिर्भूतनाथः || 16 ||

इदं देव्याः स्तोत्रं पठति मनुजो यस्त्रिसमयं
शुचिर्भूत्वा विश्वे भवति धनदो वासवसमः |
वशा भूपाः कांता निखिलरिपुहंतुः सुरगणा
भवंत्युच्चैर्वाचो यदिह ननु मासैस्त्रिभिरपि || 17 ||

इति श्रीशंकराचार्यविरचितः प्रचंडचंडिकास्तवराजः समाप्तः ||